# परिवेशः

## (मातृ-शब्दस्य प्रयोगः)

इयं भारती मनोजस्य **माता** । मनोजः प्रतिदिनं **मातरं** प्रणमति । एकदा मनोजः **मात्रा** सह नदीतटे भ्रमति स्म । तदा सः **मात्रे** निवेदयति - **मातः** ! कः नाम परिवेशः, कृपया वदतु । माता वदति - पुत्र! अस्मान् परितः यः दृश्यमानः अस्ति सः परिवेशः । भूमिः, जलं, गगनं, वायुः, वृक्षाः, जीवाः च विशेषतः परिवेशः इति परिचितः । पुत्रः पुनः पृच्छति - मातः ! केन भावेन सः दूषितः भवति ? माता वदति, गृहस्य अवकरद्वारा तथा च कृषिक्षेत्रे रासायनिकसारस्य प्रयोगद्वारा भूमिः दूषिता भवति । नगरस्य शिल्पागारस्य च वर्ज्यद्रव्यद्वारा जलं प्रदूषितं भवति । तैलचालितयानानां धूमद्वारा वायुः प्रदूषितः भवति । शिल्पागारस्थापनार्थम् अरण्यक्षेत्राणि विनष्टानि भवन्ति । वृक्षाणां छेदनं भवति । तेन वन्यजीवाः विनाशं गच्छन्ति । प्रतिदिनम् उत्तापस्य वृद्धिः भवति । आवश्यकसमये मेघाः न वर्षन्ति ।

पुत्रः **मातुः** सकाशात् परिवेशस्य प्रदूषणविषयं जानाति । सः पुनः मातरं पृच्छति - परिवेशः कथं सुरक्षितः भवेत् । माता वदति - यदि वयं गृहस्य शिल्पागारस्य च अवकरान् इतस्ततः न क्षिपामः, निर्दिष्टे स्थाने स्थापयामः, वृक्षाणां रोपणं कुर्मः, अनावश्यकं वस्तु त्यजामः, तर्हि परिवेशः सुरक्षितः भवेत् । **मातुः** कथनेन पुत्रः सन्तुष्टः भवति । **मातरि** तस्य अधिकः विश्वासः अस्ति । अतः नूनम् अहं दश वृक्षान् रोपयामि, परिवेशस्य सुरक्षां च करोमि- इति सः शपथं नयति । माता आनन्देन पुत्रं मनोजम् आलिङ्गति ।

अतः वक्तुम् उचितम् - ''वृक्षः रक्षति रक्षितः ।''

**परिवेशः, अवकरः, शिल्पागारः, प्रदूषणम्, वृक्षरोपणम्, सुरक्षा, रक्षितः ।**



## टिप्पणी

**शब्दार्थ :**

भ्रमति स्म - भ्रमणं कृतवान् (ବୁଲୁଥିଲା) ।

दूषितः - दोषयुक्तः (କଳୁଷିତ) ।

इतस्ततः - यथेच्छस्थाने (ଏଣେତେଣେ) ।

तर्हि - ततः (ତା'ହେଲେ) ।

नूनम् - निश्चयेन (ନିଶ୍ଚିତ ଭାବରେ) ।

आलिङ्गति - आलिङ्गनं करोति (ଆଲିଙ୍ଗନ କରୁଛନ୍ତି) ।

परितः - चतुः पार्श्वे (ଚାରିପାଖରେ) ।

छेदनम् - कर्त्तनम् (କାଟିବା) ।

सकाशात् - समीपात् (ନିକଟରୁ) ।

त्यजामः - त्यागं कुर्मः (ଫିଙ୍ଗୁ) ।

सन्तुष्टः - तृप्तः (ତୃପ୍ତ ହେବା) ।

रोपयामि - रोपणं करोमि (ଲଗାଇବି) ।

रक्षितः - रक्षां प्राप्तः (ସୁରକ୍ଷିତ) ।

अवकरद्वारा - त्याज्यद्रव्यद्वारा (ଅଳିଆ ଆବର୍ଜନା ଦ୍ୱାରା) ।

वर्ज्यद्रव्यद्वारा - त्याज्यद्रव्यद्वारा (ଅଳିଆ ଆବର୍ଜନା ଦ୍ୱାରା) ।

आवश्यकसमये - उचितकाले (ଠିକ୍ ସମୟରେ) ।

## अभ्यासः

**१. पठत, लिखत च -**

**प्रथमा विभक्तिः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| मातृ | माता | मातरौ | मातरः |
| दुहितृ | दुहिता | .............. | .............. |
| यातृ | याता | .............. | .............. |
| ननान्दृ | ननान्दा | .............. | .............. |
| स्वसृ | स्वसा | स्वसारौ | स्वसारः |

**द्वितीया विभक्तिः**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| मातृ | मातरम् | मातरौ | मातॄः |
| दुहितृ | .............. | दुहितरौ | .............. |
| यातृ | यातरम् | .............. | .............. |
| ननान्दृ | .............. | .............. | ननान्दॄः |
| स्वसृ | स्वसारम् | स्वसारौ | स्वसॄः |

### तृतीया विभक्तिः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| मातृ | मात्रा | मातृभ्याम् | मातृभिः |
| दुहितृ | दुहित्रा | .............. | .............. |
| यातृ | .............. | .............. | यातृभिः |
| ननान्दृ | .............. | ननान्दृभ्याम् | .............. |
| स्वसृ | स्वस्रा | .............. | .............. |

### चतुर्थी विभक्तिः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| मातृ | मात्रे | मातृभ्याम् | मातृभ्यः |
| दुहितृ | .............. | .............. | दुहितृभ्यः |
| यातृ | यात्रे | .............. | .............. |
| ननान्दृ | ननान्द्रे | .............. | .............. |
| स्वसृ | .............. | .............. | स्वसृभ्यः |

### पञ्चमी विभक्तिः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| मातृ | मातुः | मातृभ्याम् | मातृभ्यः |
| दुहितृ | दुहितुः | .............. | .............. |
| यातृ | .............. | .............. | यातृभ्यः |
| ननान्दृ | .............. | ननान्दृभ्याम् | .............. |
| स्वसृ | स्वसुः | .............. | .............. |

### षष्ठी विभक्तिः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| मातृ | मातुः | मात्रोः | मातृणाम् |
| दुहितृ | .............. | दुहित्रोः | .............. |
| यातृ | यातुः | .............. | .............. |
| ननान्दृ | .............. | .............. | ननान्दृणाम् |
| स्वसृ | स्वसुः | .............. | .............. |

### सप्तमी विभक्तिः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| मातृ | मातरि | मात्रोः | मातृषु |
| दुहितृ | .............. | .............. | दुहितृषु |
| यातृ | .............. | यात्रोः | .............. |
| ननान्दृ | ननान्दरि | .............. | .............. |
| स्वसृ | .............. | .............. | स्वसृषु |

## सम्बोधने

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| मातृ | मातः! | मातरौ! | मातरः! |
| दुहितृ | .............. | .............. | दुहितरः! |
| यातृ | यातः! | .............. | .............. |
| ननान्दृ | .............. | ननान्दरौ! | .............. |
| स्वसृ | .............. | .............. | स्वसारः! |

मातृ - ମା, दुहितृ - ଝିଅ, यातृ - ଯା’, ननान्दृ - ନଣନ୍ଦ, स्वसृ - ଭଉଣୀ

**२. योग्यपदेन शून्यस्थानं पूरयत -**

यथा - माता गृहं गच्छति । (मातृ, प्रथमा - एकवचने)

(क) .................. सेवां करोति । (दुहितृ, प्रथमा - एकवचने)

(ख) .................. विद्यालयं याति । (स्वसृ, प्रथमा - एकवचने)

(ग) .................. रन्धनं कुर्वन्ति । (मातृ, प्रथमा - बहुवचने)

(घ) .................. पुस्तकानि नयन्ति । (दुहितृ, प्रथमा - बहुवचने)

(ङ) .................. कथाः कथयन्ति । (मातृ, प्रथमा - बहुवचने)

(च) .................. स्नेहं कुर्वन्ति । (स्वसृ, प्रथमा - बहुवचने)

(छ) .................. भोजनं परिवेषयन्ति । (मातृ, प्रथमा बहुवचने)

(ज) अहं .................. पश्यामि । (स्वसृ, द्वितीया - एकवचने)

(झ) रमा .................. सह भ्रमति । (मातृ, तृतीया - एकवचने)

(ञ) शिशवः .................. कथां शृण्वन्ति । (दुहितृ, पञ्चमी - एकवचने)

(ट) .................. रन्धनं मधुरं भवति । (मातृ, षष्ठी - बहुवचने)

(ठ) .................. मम विश्वासः अस्ति । (स्वसृ, सप्तमी - एकवचने)

**३. उदाहरणानुसारं शून्यस्थानं पूरयत -**

**माता** यानेन गच्छति ।

................. अहं प्रणमामि ।

................. पत्रम् अहं पठामि ।

| | | |
|---|---|---|
| | .................. | सह पुरीं गच्छामि । |
| | .................. | मयि स्नेहं करोति । |
| स्वसृ | .................. | नद्यां स्नानं कुर्वन्ति । |
| मातृ | .................. | कूपतः जलम् आनयन्ति । |
| दुहितृ | .................. | पुस्तकं नूतनम् अस्ति । |
| | .................. | गृहे रन्धनं करोति । |
| | .................. | पितुः स्नेहः अस्ति । |

४. **एकपदेन उत्तरं कुरुत -**

(क) मनोजः प्रतिदिनं कां प्रणमति ?

(ख) कया सह मनोजः नदीतटे भ्रमति स्म ?

(ग) अस्मान् परितः कः दृश्यमानः अस्ति ?

(घ) रासायनिकसारस्य प्रयोगद्वारा का दूषिता भवति ?

(ङ) तैलचालितयानानां धूमद्वारा कः प्रदूषितः भवति ?

(च) कथम् अरण्यक्षेत्राणि विनष्टानि भवन्ति ?

(छ) कुतः पुत्रः प्रदूषणविषयं जानाति ?

(ज) कुत्र पुत्रस्य अधिकः विश्वासः अस्ति ?

(झ) कति वृक्षान् रोपयामि इति पुत्रः शपथं नयति ?

(ञ) माता सानन्दं कम् आलिङ्गति ?

५. **शून्यस्थानं पूरयत -**

(क) ............... कः नाम परिवेशः ?

(ख) मातः ! केन भावेन सः ............... भवति ?

(ग) शिल्पागारस्थापनार्थम् .............. विनष्टानि भवन्ति ।

(घ) तेन वन्यजीवाः ............... भवन्ति ।

(ङ) प्रतिदिनम् ................ वृद्धिः भवति ।

(च) ................ प्रदूषणविषयं पुत्रः मातुः सकाशात् जानाति ।

(छ) ................. रोपणं कुर्मः ।

(ज) तर्हि परिवेशः .............. भवेत् ।

(झ) ................. कथनेन पुत्रः तृप्तः भवति ।

(ञ) ................ तस्य अधिकः विश्वासः अस्ति ।

**(मातुः, मातः !, उत्तापस्य, मातरि, सुरक्षितः, दूषितः,**

**विनष्टाः, अरण्यक्षेत्राणि, परिवेशस्य, वृक्षाणाम्)**

**६. मातृभाषया अनुवादं कुरुत -**

(क) कृषिक्षेत्रे रासायनिकसारस्य प्रयोगद्वारा भूमिः दूषिता भवति ।

(ख) तैलचालितयानानां धूमद्वारा वायुः प्रदूषितः भवति ।

(ग) तेन वन्यजीवाः विनष्टाः भवन्ति ।

(घ) परिवेशस्य प्रदूषणविषयं पुत्रः मातुः सकाशात् जानाति ।

(ङ) अनावश्यकं वस्तु त्यजामः ।

(च) मातुः कथनेन पुत्रः सन्तुष्टः भवति ।

(छ) मातरि तस्य अधिकः विश्वासः अस्ति ।

(ज) अतः नूनम् अहं दश वृक्षान् रोपयामि ।

(झ) माता सानन्दं पुत्रं मनोजम् आलिङ्गति ।

(ञ) अतः वक्तुम् उचितम् - ''वृक्षः रक्षति रक्षितः ।''

**७. विक्षिप्तवर्णैः शुद्धं शब्दं लिखत -**

यथा - शः वे रि प = परिवेशः

| | |
|---|---|
| (१) प्र ति ण म = .................... | (२) षि दू तः = .................... |
| (३) जीवाः वन्य = .................... | (४) प उ त्ता स्य = .................... |
| (५) सु क्षि र तः = .................... | (६) अ क व रा न् = .................... |

(७) स्त इ त तः = ....................    (८) सः वि श्वा = ....................

(९) मि प या रो = ....................    (१०) आ ति ङ्ग लि = ....................

८. **स्तम्भमेलनं कुरुत -**

| क | ख |
|---|---|
| केन | वायुः |
| सः | छेदनम् |
| धूमद्वारा | रूपेण |
| वृक्षाणां | परिवेशः |
| उत्तापस्य | सन्तुष्टः |
| पुत्रः | विश्वासः |
| अधिकः | वृद्धिः |

९. **उचितपदेन शून्यस्थानं पूरयत -**

(क) एषा मनोजस्य ............... । (मात्रा, मातुः, माता)

(ख) सः ............... निवेदयति । (मात्रे, मातुः, मातृः)

(ग) .............. केन भावेन सः दूषितः भवति ? (माता, मातः !, मातुः)

(घ) पुत्रः ................. सकाशात् जानाति । (मात्रा, मातुः, मातरम्)

(ङ) ................ तस्य अधिकः विश्वासः अस्ति । (मातरि, मातुः, मात्रे)

●